श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ अष्टसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टसप्ततितमः सर्गः ॥

## रावणस्याज्ञया मकराक्षस्य युद्धाय प्रस्थानम्

निकुम्भं निहतं श्रुत्वा कुम्भं च विनिपातितम्।
रावणः परमामर्षी प्रजज्वालानलो यथा॥ **6.78.1** ॥

नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्च्छितः।
खरपुत्रं विशालाक्षं मकराक्षमचोदयत्॥ **6.78.2** ॥

गच्छ पुत्र मयाऽऽज्ञप्तो बलेनाभिसमन्वितः।
राघवं लक्ष्मणं चैव जहि तौ सवनौकसौ॥ **6.78.3** ॥

रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः।
बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरम्॥ **6.78.4** ॥

सोऽभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम्।
निर्जगाम गृहाच्छुभ्राद् रावणस्याज्ञया बली॥ **6.78.5** ॥

समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीद् वचः।
रथमानीयतां तूर्णं सैन्यं त्वानीयतां त्वरात्॥ **6.78.6** ॥

तस्य तद् वचनं श्रुत्वा बलाध्यक्षो निशाचरः।
स्यन्दनं च बलं चैव समीपं प्रत्यपादयत्॥ **6.78.7** ॥

प्रदक्षिणं रथं कृत्वा समारुह्य निशाचरः।
सूतं सञ्चोदयामास शीघ्रं वै रथमावह॥ **6.78.8** ॥

अथ तान् राक्षसान् सर्वान् मकराक्षोऽब्रवीदिदम्।
यूयं सर्वे प्रयुध्यध्वं पुरस्तान्मम राक्षसाः॥ **6.78.9** ॥

अहं राक्षसराजेन रावणेन महात्मना।
आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ॥ **6.78.10** ॥

अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः।
शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः॥ **6.78.11** ॥

अद्य शूलनिपातैश्च वानराणां महाचमूम्।
प्रदहिष्यामि सम्प्राप्तां शुष्केन्धनमिवानलः॥ **6.78.12** ॥

मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः।
सर्वे नानायुधोपेता बलवन्तः समाहिताः॥ **6.78.13** ॥

ते कामरूपिणः क्रूरा दंष्ट्रिणः पिङ्गलेक्षणाः।
मातङ्गा इव नर्दन्तो ध्वस्तकेशा भयावहाः॥ **6.78.14** ॥

परिवार्य महाकाया महाकायं खरात्मजम्।
अभिजग्मुस्ततो हृष्टाश्चालयन्तो वसुन्धराम्॥ **6.78.15** ॥

शङ्खभेरीसहस्राणामाहतानां समन्ततः।
क्ष्वेलितास्फोटितानां च तत्र शब्दो महानभूत्॥ **6.78.16** ॥

प्रभ्रष्टोऽथ करात् तस्य प्रतोदः सारथेस्तदा।
पपात सहसा दैवाद् ध्वजस्तस्य तु रक्षसः॥ **6.78.17** ॥

तस्य ते रथसंयुक्ता हया विक्रमवर्जिताः।
चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः॥ **6.78.18** ॥

प्रवाति पवनस्तस्मिन् सपांसुः खरदारुणः।
निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः॥ **6.78.19** ॥

तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः।
अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ॥ **6.78.20** ॥

घनगजमहिषाङ्गतुल्यवर्णाः
    समरमुखेष्वसकृद्गदासिभिन्नाः।
अहमहमिति युद्धकौशलास्ते
    रजनिचराः परिबभ्रमुर्मुहुस्ते॥ **6.78.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टसप्ततितमः सर्गः॥